योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०७१

एकसप्ततितमः सर्गः ७१

श्रीवसिष्ठ उवाच ।

इत्युक्त्वा भगवान्ब्रह्मा ब्रह्मलोकजनैः सह ।

बद्धपद्मासनोऽनन्तसमाधानगतोऽभवत् ।। १

ओंकारार्धोऽर्धमात्रान्तः शान्तनिःशेषमानसः ।

लिपिकर्मार्पिताकार आसीदाशान्तवेदनः ।। २

तमेवानुसरन्ती सा तथैव ध्यानगा सती ।

वासनासीदशेषांशा शान्ता चाकाशरूपिणी ।। ३

परमेष्ठिन्यसंकल्पे तस्मिंस्तानवमेयुषि ।

सर्वगानन्तचिद्व्योमरूपोऽपश्यमहं यदा ।। ४

यावत्संकल्पनं तस्य विरसीभवति क्षणात् ।

तथैवाशु तथैवोर्व्याः साद्रिद्वीपपयोनिधेः ।। ५

तृणगुल्मलताशालिसमुद्भवनशक्तता ।

समस्तैवास्तमागन्तुमारब्धा च शनैःशनैः ।। ६

किल तस्य विराडात्मरूपस्याङ्गैकदेशताम् ।

सा बिभर्ति मही तेन तदसंवेदनोदयात् ।। ७

विचेतना सा विरसा बभूव परिजर्जरा ।

मार्गशीर्षान्तवल्लीव जराविधुरतां गता ।। ८

यथास्माकमसंवित्तेरङ्गाली विरसा भवेत् ।

तथा विरिंचिसंवित्तैर्धरा वैधुर्यमागता ।। ९

संपन्ना संहतानेकमहोत्पातभरावृता ।

दुष्कृताङ्गारनिर्दग्धनरकोन्मुखमानवा ।। १०

दुर्भिक्षाकाण्डदौस्थित्यदैन्यदारिद्र्यदुर्भगा ।

दुःशीलाशेषवनिता निर्मर्यादनरावृता ।। ११

पांसुप्रमन्दनीहारधूलिधूसरसूर्यका ।

द्वन्द्विमूर्खमहादुःखिव्यसनिव्याधिताकुला ।। १२

अग्निदाहजलापूरयुद्धप्रोच्छिन्नमण्डला ।

अवृष्ट्यवग्रहोन्नष्टकष्टचेष्टितपामरा ।। १३

अशङ्कितमहोत्पातपतत्पर्वतपत्तना ।

शिशुश्रोत्रियमुन्यार्यगुणिनाशरुदज्जना ।। १४

अशङ्कितस्थलीमध्यसंजातागाधकूपका ।

वर्णसंकरनारीणामासक्तजनभूमिपा ।। १५

अट्टशूलाखिलजना शिवशूलचतुष्पथा ।

केशैकशूलवनिता पात्रशूलजनेश्वरा ।। १६

दुःखशूलसमाचारा द्वन्द्वशूलाखिलप्रजा ।

अधर्मशूलवनिता पानशूलजनेश्वरा ।। १७

अधर्मशूलवलिता कुशास्त्रशतशूलिनी ।

दुर्जनाखिलवित्ताढ्या विपद्विहतसज्जना ।। १८

अनार्यवसुधापाला तदनादृतपण्डिता ।

लोभमोहभयद्वेषरागरोगरजोरता ।। १९

अप्यन्यगामिपुरुषा रुषाभिहतसद्विजा ।

अनारतपराक्रन्दपरापर्यन्तपामरा ।। २०

दस्यूत्सन्नपुरग्रामदेवद्विजसमाश्रया ।

आपातमधुरारम्भदुःखदोदरभङ्गुरा ।। २१

आलस्योल्लासविलसत्कार्यवैधुर्यधर्मिणी ।

सर्वापदुपतापान्ता क्रमेणोत्सन्नदिग्गणा ।। २२

भस्मशेषपुरग्रामा निर्जनाखिलमण्डला ।

रोरूयमाणभस्माभ्रकुण्डलोड्डामराम्वरा ।। २३

दुर्भगाडम्बरारम्भरोदनोरुरवोदरी ।
मुष्टिप्रमाणजनता जनतापानुषङ्गिणी ।। २४
नीरसाशेषदेशान्ता सर्वर्तुगुणवर्जिता ।
इत्यस्य पार्थिवे धातौ ब्रह्मणो गतवेदने ।। २५
पृथिवी पृथुवैधुर्या संपन्नासन्ननाशतः ।
अथ तत्संविदुन्मुक्तो जलधातुः क्षयोन्मुखः ।। २६
यदा विक्षुभितात्मासीत्तदा नियत्तिलङ्घनात् ।
समुत्सार्यार्यमर्यादामर्णवा विवृतार्णसः ।। २७
प्रवृत्ता विकृतिं गन्तुमुन्मत्ता इव राविणः ।
वीचिविक्षोभविन्यासैर्वेलाविपिनलावकाः ।। २८
कल्लोलवलनावर्तविवर्तोद्वर्तिताश्रयाः ।
महाभ्रभ्रमदुत्तुङ्गतरङ्गात्तनभोदिशः ।। २९
बृहद्गुलुगुलावर्तगर्जनोद्द्रवकन्दराः ।
सीकरौघमहारम्भघनसंवलिताचलाः ।। ३०
चलच्चलचलद्वीरमकराघूर्णितान्तराः ।
उल्लसन्मकराक्रान्तद्रुमकाननितोदराः ।। ३१
दरीविदारणभ्रष्टसिंहाहतजलेचराः ।
ऊर्म्युदस्तमहारत्नभरतारकिताम्बराः ।। ३२
उत्फालमकरच्छन्ननभश्चरबृहद्धनाः ।
परस्परोर्मिसंघट्टभांकारकटुटांकृताः ।। ३३
तरत्तरलमातङ्गफूत्कारा धौतभास्कराः ।
अन्योन्यवेल्लनव्यग्रप्रविदीर्णाद्रिभित्तयः ।। ३४
तटपर्वतलुण्टाकतरङ्गकरमण्डलाः ।
गर्जद्गिरिदरीगेहविशदुन्मत्तवारयः ।। ३५
भूपाः परपुराक्रान्ता लग्ना इव हतारयः ।
तारारवरणद्गेहविद्रावितनभश्चराः ।। ३६

प्रलुण्ठितवनव्यूहलूनकाननिताम्बराः ।

सपक्षपर्वताकारतरङ्गापूरिताम्बराः ।। ३७

महारवमरुच्छिन्नकल्लोलाचलचालिताः ।

चञ्चत्तीरगिरिव्रातपतत्तटरटज्जलाः ।। ३८

उल्लसद्विपुलावर्तप्रोत्क्षिप्तमकरोत्कराः ।

विमज्जन्निस्तलावर्तनिगीर्णगिरिकन्दराः ।। ३९

दरीदलनसंप्राप्तदृषद्दशनदन्तुराः ।

श्रृङ्गलम्बिदरीप्रान्तमग्नवीचिजलेभकाः ।। ४०

व्यालोलवलनाक्रान्तविटपिप्रोतकच्छपाः ।

यमेन्द्रवसुधावाहैरुत्कर्णैर्भयविह्वलैः ।। ४१

श्रूयमाणपतच्छैलतटीकटकटारवाः ।

मत्स्यपुच्छच्छटाच्छिन्नमग्नोन्मग्नद्रुताद्रयः ।। ४२

लीलालूनवनव्यूहशीतलासारवारयः ।

प्रज्वलद्वडवावह्निज्वालावलिमिलज्जलाः ।। ४३

सरसेन विभोर्नाशैर्विशङ्कितमहानलाः ।

मिलच्छिखरिमालाग्रजलमातङ्गयोधिनः ।। ४४

नृत्यन्तीव तरङ्गौधैर्जलावलनवेधिनः ।

जलाचलाचलान्योन्यसंघट्टस्फोटपण्डिताः ।। ४५

बृहद्गिरिवनव्रातप्राणिमण्डलमण्डिताः ।

उड्डामरवनेमेन्द्रभेरीवादनभासुरैः ।। ४६

असुरैरिव पातालं कल्लोलैरलमाकुलाः ।

अथोदपतदुन्नासदिङ्नागवदनध्वनिः ।। ४७

पातालतलताल्वन्तर्विस्फोटामोटनोद्भटः ।

चञ्चलाचलकीलोर्वी चचाल क्षणचालिता ।। ४८

लोला शैवालवल्लीव व्यालोलाम्भोधिलङ्घिता ।

अथ दुर्वारनिर्घोषनिर्वाताडम्बरान्विता ।। ४९

पुस्फोटेव पतन्ती द्यौर्दिशां पतिरवारवैः ।

आवर्तवलनाकाराः केतवः पेतुरम्बरात् ।। ५०

हेमरत्नमया मुक्ताः सिन्दूरभुजगा इव ।

ककुब्भ्यो नभसो भूमेरुदगुर्दग्धदिक्तटाः ।। ५१

चलज्ज्वालाजटाटोपा विविधोत्पातपङ्कयः ।

पृथ्व्यादीन्यसुरादीनि ब्रह्मोन्मुक्तानि सर्वतः ।। ५२

द्विविधानि महाभूतान्यलं संक्षोभमाययुः ।

चन्द्रार्कानिलशक्राग्नियमाः कोलाहलाकुलाः ।। ५३

परिपातपरा आसन्ब्रह्मलोकगतेश्वराः ।

कम्पैः कटकटारावपतत्पादपपङ्कयः ।। ५४

भूमेरन्वभवन्भूरिदोलान्दोलनमद्रयः ।

भूकम्पलोलकैलासमेरुमन्दरकन्दराः ।

पेतुः कल्पतरून्मुक्ता रक्तस्तबकवृष्टयः ।। ५५

लोकान्तराद्रिपुरवारिधिकाननान्त-

मुत्पातकल्पपवनेन मिथो हतानाम् ।

कोलाहलैर्जगदभूत्प्रविकीर्णशीर्णं

पूर्णार्णवे त्रिपुरपूर इवाभिपाती ।। ५६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे उ० पाषा० कल्पक्षोभवर्णनं नामैकसप्ततितमः सर्गः ।। ७१ ।।